# 2023

## SANSKRIT — HONOURS

**Paper : CC-4**

**[Self Management in the Gītā]**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I**

**(Marks : 30)**

1. अधोलिखितेषु **दश प्रश्नाः** समाधेयाः (**संस्कृतभाषया देवनागरीलिप्या च**)। 2×10

(a) श्रीमद्भगवद्गीतायाः प्रवक्ता कः? श्रोता च कः?

(b) इन्द्रियाणि कतिविधानि सन्ति? तेषां नामानि उल्लिख्यन्ताम्।

(c) मनसः परं किमस्ति? तस्मादपि परं किम्?

(d) प्रकृतिः कतिविधा? काश्च ताः?

(e) महाभूतानि कानि? तेषां नामानि उल्लिख्यन्ताम्।

(f) राजोगुणात् के जायन्ते?

(g) जीवशरीरे के विषयाः सन्ति?

(h) गुणाः कतिविधा? गुणाः कस्मात् समुद्भवन्ति?

(i) बुद्धेः परतः कः भवति?

(j) क्षेत्रजः कः भवति?

(k) श्रीमद्भगवद्गीतायाः नामान्तरं किम्?

(l) तमोगुणस्य प्रभावः कीदृशः भवति?

2. निम्नलिखितयो**रेकस्य सुरभाषया देवनागरीलिप्या च** व्याख्या कार्या। 6×1

(a) सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥

(b) तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥

3. (a) कस्यचन ***एकस्य*** विग्रहवाक्यं प्रदाय **संस्कृतभाषया देवनागरीलिप्या च** समासनाम लिख्यताम्। 2×1

(i) प्रमादमोहौ 2 (a) प्रश्ने।

(ii) सुखसङ्गेन 2 (b) प्रश्ने।

(b) कस्यचि***देकस्य*** सन्धिविच्छेदः कार्यः। 1×1

(i) भवतोऽज्ञानमेव 2 (a) प्रश्ने।

(ii) चानघ 2 (b) प्रश्ने।

(c) कस्यचि***देकस्य*** व्युत्पत्तिः निर्णेया। 1×1

(i) सञ्जायते 2 (a) प्रश्ने।

(ii) बध्नाति 2 (b) प्रश्ने।

**Section - B**

**Unit - II**

**(Marks : 15)**

4. निम्नलिखितयोः कस्यचि***देकस्य*** उत्तरं प्रदेयम्। 10×1

(a) बुद्धिः कतिविधा? तासां स्वरूपम् आलोच्यताम्।

(b) श्रीमद्भगवद्गीतायां वर्णिता ज्ञानयोगस्य प्रशस्तिः स्वभाषया वर्णनीया।

5. अधोलिखितयोः कस्यचि***देकस्य*** आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। 5×1

(a) अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥

(b) विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥

## Section - C

### Unit - I

### (Marks : 20)

**6.** अधोदत्तेषु विषय***द्वयस्य*** संक्षिप्ततया टीका लेखनीया। 5×2

निष्कामकर्मयोगः, श्रद्धा, अक्षरब्रह्मयोगः।

**7.** अधोलिखितयोः प्रश्नयोः ***एकतरस्य*** उत्तरं प्रदेयम्। 10×1

(a) 'कर्मण्येवाधिकारस्ते'– कः क प्रति एवमुपदिष्टवान्? कथं कर्मणि अधिकारः वर्तते?

(b) भक्तस्य स्वरूपं समुपवर्ण्यताम्।

---